| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| | अत्यन्ताभ्यासे द्वादशवार्षिकव्रतम् । इत्युपपातके अगम्यागमनप्रायश्चित्तं समाप्तम् ॥ * ॥ | १८० धेनवः । | ५४० कार्षापणाः । | १०० गावः । अशक्तौ १०० कार्षापणाः । |
| अथ परिवेदनादि । | ज्येष्ठेऽनिर्विष्टे कनीयान्निर्विशन् परिवेत्ता । परिवित्तो ज्येष्ठः । परिवेदनीया कन्या । परिदायी दाता । परिकर्त्ता याजकः । ते सर्व्वे पतिताः । एतेषां प्रायश्चित्तम् । | | | |
| | संवत्सरं प्राजापत्यम् । एतत् कामतः । अकामतोऽर्द्धम् । अत्रापवादः । "देशान्तरस्थक्लीवैकवृषणानसहोदरान् । वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः ॥ जड़मूकान्धबधिरकुब्जवामनकुण्ठकान् । अतिवृद्धानभार्य्यांश्च कृषिसक्तान्नृपस्य च । धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा । कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥" | ३० धेनवः । | ९० कार्षापणाः । | १७गावः । अशक्तौ १६॥/१६। कार्षापणाः । |
| व्रात्यत्वम् । अर्थात् सावित्रीपतितत्वम् । षोडशाब्दपर्य्यन्तमुपनयनाभावे ब्राह्मणस्य व्रात्यत्वम् । | पितृमातृरहितनिःस्वजनस्य सावित्रीपाते प्राजापत्यत्रयम् । यथाविध्युपनयनञ्च । आलस्यानवधानादिना सावित्रीपाते तु व्रात्यस्तोमयागः । | ३ धेनवः । | ९ कार्षापणाः । | यथाशक्ति । |
| एकविंशतिवर्षपर्य्यन्तमुपनयनाभावे क्षत्त्रियस्य व्रात्यत्वम् । त्रयोविंशतिवर्षपर्य्यन्तमुपनयनाभावे वैश्यस्य व्रात्यत्वम् । | तद्विकल्पकं दिनत्रयाधिकमासचतुष्टयसमाप्यमुद्दालकव्रतम् । तद्व्रतं यथा । द्वौ मासौ यावकेन वर्त्तयेत् मासं पयसा अर्द्धमासमामिक्षया अष्टरात्रं घृतेन षड़रात्रमयाचितं त्रिरात्रमब्भक्षः अहोरात्रमुपवसेत् । | सपादनवधेन्वसम्भवात् १० धेनवः । | २७॥० कार्षापणाः । | यथाशक्ति । |
| | देशोपप्लवादिना सावित्रीपतने एकविंशतिरात्रं प्रसृतिमितयावकपानम् । तत उपनयनम् । | ४ धेनवः । | ९॥० कार्षापणाः । | यथाशक्ति । |
| अथावकीर्णम् । अर्थाद्ब्रह्मचारिणो योषिद्गमनम् । | षण्मासं ब्रह्महत्याव्रतम् । खरचर्म्मपरिधानञ्च । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | ५ गावः । अशक्तौ ४/१४ कार्षापणाः । |
| | अभ्यासे संवत्सरं ब्रह्महत्याव्रतम् । | १५ धेनवः । | ४५ कार्षापणाः । | ६ गावः । अशक्तौ ८/६॥ कार्षापणाः । |
| पितृष्वसृसुतादिपरिणयनम् । आदिना मातृष्वसृसुतामातुलसुतामातामहसपिण्डासगोत्रासमानप्रवरादीनां ग्रहणम् । | चान्द्रायणम् । त्यागानन्तरं मातृवद्भरणम् । एतत् ज्ञानतः । | सार्द्धसप्तधेन्वसम्भवात् ८धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | अज्ञाने कृच्छ्राब्दपादः । | ४ धेनवः । | ११।० कार्षापणाः । | यथाशक्ति । |
| अग्न्युत्सादनम् । अर्थात् अग्निहोत्रिणामग्नित्यागः । | कामतः संवत्सरोत्सर्गे चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | द्विवर्षोत्सर्गे सोमायनचान्द्रायणे । एतदनुसारेणोनाधिककालयोरूह्यम् । | सार्द्धाष्टधेन्वसम्भवात् ९ धेनवः । | २५॥० कार्षापणाः । | यथाशक्ति । |
| गृहस्थस्य चिरतरकालानग्नित्वम् । | गोवधोक्तत्रैमासिकव्रतम् । अल्पकाले अनाधाने च चान्द्रायणम् । | १२ धेनवः । | ३६ कार्षापणाः । | १० गावः । १ वृषः । अशक्तौ १५ कार्षापणाः । |